बाणोच्छिष्टं जगत्सर्वम्

Dr. KIRAN.A.U

संस्कृतभाषायाः साहित्ये गद्यस्य प्रयोगोऽतीव प्राचीनकालतो दृश्यते। तदात्वे गद्यस्याधिकं महत्त्वं स्वीक्रियते स्म। अत एव कथ्यते "गद्यं कवीनां निकषं वदन्ति इति'। संस्कृतभाषायाः कृष्णयजुर्वेदब्राह्मणग्रन्थेषु, उपनिषत्सु, निरुक्ते, च गद्यस्योत्कृष्टं स्वरूपमुपलभ्यते। परवर्तिकाले तु, वेदानां व्याख्यां सायणः गद्ये एवाकार्षीत्। सर्वेषां पद्यकाव्यानां टीका, भाष्याण्यपि गद्यमयानि सन्ति। सुबन्धोः वासवदत्ता, दण्डिनो दशकुमारचरितम्, बाणभट्टस्य हर्षचरितम्, कादम्बरी च, अम्बिकादत्तव्यासस्य शिवराजविजयनामकं काव्यं चापि गद्य एव समुपलभ्यन्ते।

अपूर्ववस्तुनिर्माणक्षमस्य कवेः कर्म काव्यं, तच्च दृश्यश्राव्य भेदेन पुनः काव्यं द्विधा मतम्, गद्य-पद्य-चम्पु-भेदैस्त्रिविधं स्वरूपम्। महाकविना दण्डिना स्वकीये काव्यादर्शे अन्येषां खण्डकथादिभेदानां कथाख्यायिकयोर्मध्येऽन्तर्भावात द्विविधमेवोक्तम् तथा हि-

अत्रैवान्तर्भविष्यन्ति शेषाश्चारव्यानजातयः।

तत्रैव कथाख्यायिकयोर्लक्षणे यथा-

गद्यं तु गदितं द्वेधा कथा चाख्यायिकेति च।
कथा कल्पितवृत्तान्ता सत्यार्थाख्यायिका मता।।१

प्रस्तुता कादम्बरी कस्मिन् काव्ये अन्तर्भाविता भवितुमर्हति

-इत्यत्राग्निपुराणे सुस्पष्टमेवोक्तम् यत्-

श्लोकैः स्ववंशं संक्षेपात् कविर्यत्र प्रशंसति।
मुख्यस्यार्थावताराय भवेद्यत्र कथान्तरम्।।
परिच्छेदो न यत्र स्यात् भवेद्वा लम्भकैः क्वचित्।
सा कथा नाम, तद् गर्भे निबध्नीयाच्चतुष्पदीम्।२

अनेनप्रकारेणोपलब्धसाहित्यशास्त्रग्रन्थेषु "कादम्बरी" गद्यकाव्यं "कथा" इति सुनिश्चितं भवति। न चात्र विशङ्कनीयः यदियं "कादम्बरी" चम्पुकाव्यकोट ौ समायाति, यतो हि- "गद्यपद्यमयं काव्यं" इति लक्षणस्य प्रत्यक्षविरोधात्। आंगलभाषापरिष्कृतायां कादम्बर्यां प्रसिद्धविदुषा काले महाशयेन भूमिकायां स्पष्टमेवोक्तं यदियं "कथा" वर्तते। उपर्युक्तैरेभिः प्रमाणैः सुतरां सिद्धयति यदियं "कादम्बरी" प्रथमतः "गद्यकाव्यम्"; गद्यकाव्येषु च कथाकाव्यमिति सुनिश्चितमिति।

संस्कृतगद्यसाहित्ये दण्डिसुबन्ध्वोरनन्तरमेव महाकवेर्बाणभट्टस्य स्थानं समुपलभ्यते, ऐतिह्यस्य दृष्ट्या अस्य महाकवेः चरित्रं तिरोहितं न भवति। महाकविरयं कन्याकुब्जाधिपतेः शिलादित्यहर्षवर्धनस्य सभापण्डित आसीत्। हर्षवर्धनस्य कालः क्रैस्तवाब्दस्य ६०६ वर्षादारभ्य ६४७ वर्षं यावत्स्वीक्रियते। अयं हि शोणनदस्य तटे शाहाबादमण्डले-प्रीतिकूटनामकनगरे प्रतिवसति स्म। हर्षचरिते अस्य वंशवर्णनं विस्तरेण उपलभ्यते। ब्रह्मणः प्रजापतेः मानसपुत्रेषु पुलह-ऋषेः पुत्रस्य वात्स्यायनस्य गोत्रसम्भवाः कुबेर-पाशुपत-अर्थपति चित्रभानवः क्रमेणाभूवन्। चित्रभानोस्तनयः बाणभट्टः बभूव। राजदेवी नाम्नी माता बाल्यावस्थायामेवास्य लोकान्तरमगमत्।

बाणस्य समयः

नास्त्यविदितं विदुषां यत् संस्कृतसाहित्यस्य कविकुले बाण एव एतादृशः महाकविः यस्य जीवनचरितविषये पर्याप्तं ज्ञानं सामग्री च सुलभतया मिलति। अन्तरङ्ग बहिरङ्गप्रमाणपरिशीलनेन निश्चप्रचमेतत् यत्-महाकवेर्बाणस्य समयः सप्तमशतकस्य पूर्वार्द्धात् किञ्चिदुत्तरार्धं इति।

बाणस्य कृतयः

प्राप्तानुसन्धानेन यद्यपि बाणस्य तिस्रः कृतयः प्रामाणिकरूपेणोपलब्धाः सन्ति-तथापि महाकवेर्महाकवित्वं हर्षचरित-कादम्बर्योरुपर्येवाश्रितमस्ति। उपलब्धाः तिस्रः रचनाः सन्ति-१ हर्षचरितम् २. कादम्बरी ३.चण्डीशतकञ्चेति। केचन विद्वांसः "पार्वतीपरिणय" नामक नाटकमपि बाणस्य कृतिमामनन्ति।

बाणस्य काव्यदृष्टिः, प्रतिभा, गद्यशैली च

संस्कृत गद्यसाहित्ये महाकवेर्बाणस्य महदुज्ज्वलं स्थानं विद्यते। वैदर्भी-रीति गुम्फितास्य शैली गद्यकाव्यकविभ्यः मानदण्डरूपेणादर्शभू ताऽस्ति। प्रभावोत्पादकस्य गद्यस्य रचनायां ते परमप्रवीणाः सन्ति। ये केचनसमालोचकाः बाणगद्यं भारतीयारण्यमिव भयाक्रान्तं तथा चाप्रसिद्धैः क्लिष्ट शब्दैर्मण्डितञ्चामनन्ति, वस्तुतस्ते यथार्थनिरूपणे सर्वथा दूरङ्गमाः प्रतीयन्ते। यत्र कविवरेण बाणभट्टेन कथासाहित्ये चर्चितानां पात्राणां चित्रणे प्रकर्षतः प्रभावोत्पादकतवं च कलावैशिष्ट्यं च समुत्पादयितुं स्थाने स्थाने समासबहुलायाः ओजोगुणमण्डितायाः शैल्याःप्रचुरः प्रयोगः कृतस्तत्रैवान्यत्र लघुवाक्यकदम्बानां प्रयोगेण स्वशैलीविधानमपि सुस्थापितम्। क्रान्तदर्शिनः कवयः कस्या अप्येकस्या कलायाः क्रीतदासा न भवन्ति, ते तु उन्मुक्तगगने सञ्चरणशीलाः परमस्वतन्त्राः भवन्ति। विषयसापेक्षतया यथाविहितं मनोऽनुकूलं शैलीविधानमपि समाचरन्तिते। तथा हि कविवरेण बाणभट्टेन कादम्बर्यां अट व्याः सन्ध्यायाश्च वर्णन प्रसङ्गे यत्र दीर्घसमासानां मनोरमा छटा प्रदर्शिता तत्रैव वियोगदशा वर्णनावसरे स्वल्पेनां प्रासादिकवाक्यानां हृद्या उत्कृष्टा च सुषमा अप्युपस्थापिता। कविताकामिनीविलासचतुरस्य बाणस्य लेखविन्यासः कलापेक्षानुरूपः विषयवस्तुनः नितान्तमनुकूलः हृद्यः सरसः च विद्योतते।

यत्र हृद्गतभावनानामभिव्यक्तिरस्ति तत्र न समासानां प्रयोगः न चापि वाक्यानां दैर्घ्यमस्ति। स्वल्पेषु वाक्येष्वेवोचितं वर्णनं विद्यते। अवलोकयन्तु, कादम्बर्यामेव वर्णी कपिञ्जलः ब्रह्मचारिणः पुण्डरीकस्य कामवेगेनोन्मथनावसरे भर्त्सनां करोति-

"सखे पुण्डरीक! नैतदनुरूपं भवतः, क्षुद्रजनक्षुण्ण एष मार्गः। धैर्यधना हि साधवः। किं यः कश्चित् प्राकृत इव विकलीभवन्तमात्मानं न रुणत्सि। क्वे ते तद् धैर्यम्? क्वासौ इन्द्रियजयः"? इत्यादि।

अनेनैव प्रकारेणान्यत्रापि शुकनासोपदेशे तथैव प्रयुक्तमस्ति। परञ्च तत्रैव राजवैभववर्णनावसरे राज्ञः तारापीडस्य चरित्र चित्रणे- "नल-नहुष ययाति-धुन्धुमार-भरत-भगीरथ-दशरथ-प्रतिमः, भुजबलार्जित भूमण्डलः, फलितशक्तित्रयः मतिमान्, उत्साहसम्पन्नः४..... अपि च - तस्य राज्ञः तारापीडस्य वैशिष्ट्यं इति।

नारीसौन्दर्यचित्रणावसरे- महाश्वेतावर्णने-" तस्य च दक्षिणां मूर्तिमाश्रित्य ाभिमुखीमासीनाम्, उपरचितब्रह्मासनाम्, अतिविस्तारिणा सर्वादिङ्मुखप्लावकेन प्रलय-परिप्लुत-क्षीरपयोधि-पुर-पाण्डुरेण अतिदीर्घकालसञ्चितेन ५..... इत्यादि। कादम्बरी वर्णनम्-महाश्वेतया साकं राजकुमारः चन्द्रापीडः कन्यकान्तः पुरं प्रविश्य. श्रुत्वा च कन्यकानां नानाविधानि वचांस्यनुभूय च सौन्दर्यातिशयं सः कादम्बरीभवनसमीपमाययौ-"नीहारायमाणमलिन-विप्रकीर्णैवकुल-सके-सीधु-धारा-घूलिभि .....६। "तत्र च मध्यभागे पर्य्यन्तरचितमण्डलेनाधः उपविष्टेन चानेक सहस्रसंख्येन परिस्फुरदाभरण समूहेन कल्पलतानिवहेनेव ७.....।"नूपुर-मणि-किरणचक्रवालेन गुरु नितम्ब-भर-खिन्नोरुयुगल ८ ..... इत्यादि। कादम्बर्यां प्रकृतेर्वणनञ्च अतितरां ललितं च भाति-विन्ध्याटव्याः भयङ्करतायाः चित्रणं कविः यत् परमकौशलतया कृतवान् तत्तु मानसे परं विस्मयमातनोति भयेन च मद्यता हृदयमापूरयति -" नख - मुख-लग्नेभ-कुम्भ - मुक्ताफल-लब्धः शबरसेनापतिभिरहन्यमानकेशरशना .....इत्यादि।

कवेः तपोवनवर्णनं सर्वविधप्रभावोत्पादक वर्णनीयविषयविभूषितमस्ति, तद् दृश्यं न कदापि विस्मरणीयं भवितुमर्हति यत्र जरदन्धतापसाः परिचितैः वानरैः दत्तहस्तावलम्बा भवन्तः तपोवनं प्रवेश्यमानाः ततश्च निष्कास्यमाना दृष्टा भवन्ति। ऋतूनां वर्णनमपि अत्यन्तमेव मनोरमं कृतमस्ति। प्रभात - सन्ध्यान्धकार चन्द्रोयादिसम्बन्धीनि प्राकृतिकानि दृश्यानि कविना अतिशयित सहृदयभावेन याथार्थ्येन च चित्रितानि सन्ति।

अलङ्कारः

कविः उपमोत्प्रेक्षाश्लेषविरोधाभासादिकानां अलङ्काराणां महत्या समीचीनया रीत्या प्रयोगविधानञ्च दीयते। उपमामाश्रित्य अ वस्य इन्द्रायुधस्य

वर्णनं कीदृशं मधुरं विहितं; यथा "हरिचरणमिव सकलवसुन्धरोल्ल्ङ्घनक्षमम्, वरुण हंसमिव१० .....। राजकुलवर्णनं श्लेषेण क्रियमाणं भवति यथा -"रघुकुलमिव भरतगुणानन्दितम्, ज्योतिषमिव११.....।
अपि च उज्जयिनीनगर्य्याः सौन्दर्यं विरोधाभासमाश्रित्य दर्शयति कविः यथा- 'संगृहीतगारुडेनापिभूजङ्गभीरुणा' १२.....इति।

रसः

रीतिपरीक्षणे इव रसनिरूपणेऽपि बाणः स्वस्य नूतनं सरणिमवलम्बितवान्। रसमधिकृत्य आलङ्कारिकेभ्यः सहृदयेभ्यः कविभ्य च नूतना सरणिः अनेन समुद्घाटित। करुणविप्रलम्भ परिपोषित संभोगश्रृङ्गार एव कादम्बर्यामङ्गी रसः। कादम्बर्यां अयोगविप्रलम्भः संभोग श्रृङ्गारपर्यवसायि दृश्यते। कादम्बरी चन्द्रापीडौ प्रथमदर्शन एव अनुरक्तौ किन्तु झडित्येव विरहितौ। एवं महश्वेता पुण्डरीकौ च दर्शनमात्रेणैव गाढानुरक्तौ पारतन्त्र्येण वियुक्तौ। अनुरक्तयोः द्वयोरपि मिथुनयोः अनुरागस्य दशावस्थाः स्युः। कादम्बर्यां महश्वेता विरहकातरो पुण्डरीकः मृतो भवति। नायकः चन्द्रापीडः कादम्बरीविरहदुःख-सन्तप्तः वैशम्पायनस्य मरणं श्रुत्वा पञ्चत्वं गतः। अशरीरिं अनुसृत्य कादम्बरी महश्वेता च नायकयोः पुनर्जनिं प्रतीक्ष्य वर्तेते। नायकयोः मरणानन्तरं नायिके वियोग दुःखमेवानुभवतः। तयोः करुणविप्रलम्भ एव स्थायीभावः। एतादृश वियोगजनितः करुण एव कादम्बयँ। भोगपर्यवसायि भवति।

बाणः कवीनामिह चक्रवर्ती

यद्यपि सन्ति गद्यकाव्यानि नैकानि संस्कृतवाङ्मयसाहित्यसमवाये, तत्रापि कादम्बरी सर्वाणि काव्यानि वर्णनस्य विषयेऽतिशेते। तथाविधाः पदानामुचितप्रयोगाः भावनार्जवं, अलङ्काराणां स्वाभाविकः समावेशः, देशकालपात्रानुसारिण्याः भाषायाश्च मञ्जुलः सन्निवेशः क्वाप्यन्यत्र नावलोक्यते। अत्र वर्णनीयविषयाणां व्यापकता सर्वत्र न सम्मता वर्त्तते :-

अत्र राज्ञः शूद्रकस्य, तस्य सभायाः,चण्डालकन्यायाः, शुकस्य, विन्ध्याटव्या अगस्त्याश्रमस्य, हारीतस्य, जाबाल्याश्रमस्य, जाबालिमुनेः, प्रभातकालस्य, मृगयायाः, सन्ध्यायाः, रात्रेः, प्रभातकालस्य, उज्जयिन्याः,

राज्ञस्तारापीडस्य, विलासवत्याः महामात्यस्य शुकनासस्य, शुद्रकविलासवत्योर नपत्यताजन्यस्य दुःखस्य, अनुष्ठानविशेषेण तयोरपत्य प्राप्तेः शुकनासस्य पुण्ड रीकाभिधानपुत्रप्राप्तेः, महाश्वेताया तपश्चर्यायाः कादम्बर्याः सौन्दर्यातिशयस्य, कादम्बरीचन्द्रापीडयोः प्रणयस्य, कपिञ्जलस्य निःस्वार्थसुहृत्स्नेहस्य, अच्छोदसरसः च वर्णनानि, सहृदयहृदयरञ्जकानि सन्ति। इमान्येव मनोज्ञानि वर्णनानि समालोक्य केनचनाभिहितं - 'बाणः कवीनामिहचक्रवर्ती'ति।

उपसंहारः

कादम्बरी नाम ग्रन्थः गद्यकाव्येषु सर्वोत्तमं स्थानमावहति। शास्त्रीय दृष्ट च्या ; पाण्डित्यदृष्ट्या, विषयाणां व्यापकताया च दृष्ट्या, निपुणनिभालने कृते सति काव्यस्यास्य लोकोत्तरत्वं निर्भ्रान्तमाभाति। भावपक्ष-कलापक्ष-लोकचरित्र-शास्त्रीयतत्वसन्निवेश - अन्तर्जगत् - बाहयजगत् प्रमृतीनां वर्णने सर्वत्र कवेः असामान्या सूक्ष्मेक्षिका भवति समवलोकिता। ओजः समासोपपन्नस्य गद्यस्य रचनातन्त्रमेव बाणकृतेर्जीवातुर्भवति। तस्मादेवोच्यते "ओजःसमासभूयस्त्वमेतद गद्यस्य जीवित"मिति। कादम्बरीकथायाः सरसं वस्तु प्रौढगद्यैरेव विनिर्मितम्। अतिगंभीरा गुणालंकारभावाद्युपपन्ना अस्याः वैदर्भीरीतिः आदर्शभूता श्रेष्ठतमा ऐतिहासिकीशैली इत्यपि वक्तुं शक्यते। एतत् सर्वमेवावलोक्य समीक्षकैरभिहितं "बाणोच्छिष्टं जगत् सर्वामत्यलम्।

टिप्पणी

१. काव्यादर्शः - (१/२८)
२. अग्निपुराणम् - ३३७ - ९६ - ९७
३. कादम्बरी, पुण्डरीकायोपदेशारंभः, ६४, ४३७
४. कादम्बरी, तारापीडवर्णना -३, १३६
५. कादम्बरी, शिवमहाश्वेतयोवर्णना ४१, ३४६
६. कादम्बरी, कन्यापुरोदन्तवर्णना ८४, ४३४
७. कादम्बरी, कादम्बरीवर्णना ८६, ४३६
८. कादम्बरी, कादम्बरीवर्णना ८६, ४३१
९. कादम्बरी, विन्ध्याटवीवर्णनम् - ४७

१०. कादम्बरी - १७६

११. कादम्बरी - २००

१२. कादम्बरी - ११३

ग्रन्थसूचिः-

१. कादम्बरी, बाणभट्टः, व्यारव्याः कृष्णमोहनशास्त्री, चौखम्भा संस्कृतसंस्थान्, वारणसि, २००५.

२. कादम्बरी (एक संस्कृतिक अध्ययन) चौखम्भासंस्कृत संस्थान् वारणसि, १९५८.

३. काव्यादर्शः, दण्डिन् , व्यारव्याः आचार्य श्रीरामचन्द्र मिश्र, चौखम्भा विद्याभवन्, वारणसि, १९९३.